# Brahmakritam 10 Vishnu Stotram

# બ્રહ્મકૃતં ૧૦ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Brahmakritam 10 Vishnu Stotram

File name : brahmakRRitaM10viShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 8/6/8-15||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2025

*sanskritdocuments.org*

# બ્રહ્મકૃતં ૧૦ વિષ્ણુસ્તોત્રમ્

બ્રહ્મોવાચ ।
અજાતજન્મસ્થિતિસંયમાયાગુણાયનિર્વાણસુખાર્ણવાય ।
અણોરણિમ્નેઽપરિગણ્યધામ્ને મહાનુભાવાય નમો નમસ્તે ॥ ૮॥

રૂપં તવૈતત્પુરુષર્ષભેજ્યં શ્રેયોઽર્થિભિર્વૈદિકતાન્ત્રિકેણ ।
યોગેન ધાતઃ સહ નસ્ત્રિલોકાન્ પશ્યામ્યમુષ્મિન્નુ હ વિશ્વમૂર્તૌ ॥ ૯॥

ત્વય્યગ્ર આસીત્ત્વયિ મધ્ય આસીત્ત્વય્યન્ત આસીદિદમાત્મતન્ત્રે ।
ત્વમાદિરન્તો જગતોઽસ્ય મધ્યં ઘટસ્ય મૃત્સ્નેવ પરઃ પરસ્માત્ ॥ ૧૦॥

ત્વં માયયાઽઽત્માઽઽશ્રયયા સ્વયેદં નિર્માય વિશ્વં તદનુપ્રવિષ્ટઃ ।
પશ્યન્તિ યુક્તા મનસા મનીષિણો ગુણવ્યવાયેઽપ્યગુણં વિપશ્ચિતઃ ॥ ૧૧॥

યથાગ્નિમેધસ્યમૃતં ચ ગોષુ ભુવ્યન્નમમ્બૂદ્યમને ચ વૃત્તિમ્ ।
યોગૈર્મનુષ્યા અધિયન્તિ હિ ત્વાં ગુણેષુ બુદ્ધ્યા કવયો વદન્તિ ॥ ૧૨॥

તં ત્વાં વયં નાથ સમુજ્જિહાનં સરોજનાભાતિચિરેપ્સિતાર્થમ્ ।
દૃષ્ટ્વા ગતા નિર્વૃતમદ્ય સર્વે ગજા દવાર્તા ઇવ ગાઙ્ગમમ્ભઃ ॥ ૧૩॥

સ ત્વં વિધત્સ્વાખિલલોકપાલા વયં યદર્થાસ્તવ પાદમૂલમ્ ।
સમાગતાસ્તે બહિરન્તરાત્મન્ કિં વાન્યવિજ્ઞાપ્યમશેષસાક્ષિણઃ ॥ ૧૪॥

અહં ગિરિત્રશ્ચ સુરાદયો યે દક્ષાદયોઽગ્નેરિવ કેતવસ્તે ।
કિં વા વિદામેશ પૃથગ્વિભાતા વિધત્સ્વ શં નો દ્વિજદેવમન્ત્રમ્ ॥ ૧૫॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે અષ્ટમસ્કન્ધે ષષ્ઠાધ્યાયાન્તર્ગતં
બ્રહ્મકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૮/૬/૮-૧૫॥

bhAgavatapurANa . adhyAya 8/6/8-15..

Proofread by PSA Easwaran

*Brahmakritam 10 Vishnu Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*